सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।

मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ १८.५६॥

sarvakarmāṇyapi sadā kurvāṇo madvyapāśrayaḥ |
matprasādādavāpnoti śāśvataṁ padamavyayam || 18.56||

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः।

बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥ १८.५७॥

cetasā sarvakarmāṇi mayi sannyasya matparaḥ |
buddhiyogamupāśritya maccittaḥ satataṁ bhava || 18.57||

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।

अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि॥ १८.५८॥

maccittaḥ sarvadurgāṇi matprasādāttariṣyasi |
atha cettvamahaṅkārānna śroṣyasi vinaṅkśyasi || 18.58||

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे।

मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥ १८.५९॥

yadahaṅkāramāśritya na yotsya iti manyase |
mithyaiṣa vyavasāyaste prakṛtistvāṁ niyokśyati || 18.59||

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।

कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्॥ १८.६०॥

svabhāvajena kaunteya nibaddhaḥ svena karmaṇā |
kartuṁ necchasi yanmohātkariṣyasyavaśopi tat || 18.60||